"चिता चिन्ता द्वयोर्मध्ये चिन्ता नाम गरीयसी ।
चिता दहति निर्जीवं चिन्ता हि जीवितन्तया ॥")
दर्शनलम्भोपाययोः प्रकारभावना । इति रस-
मञ्जरी ॥ (सा च व्यभिचारिभावविशेषः । यथा,
साहित्यदर्पणे । ३ । १७० । [कृत् ॥")
"ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासताप-
चिन्तामणिः, पुं, (चिन्तायां सर्व्वकामप्रदो मणि-
रिव । शाकपार्थिवादिवत् समासः । यद्वा,
चिन्तया ध्यानधारणादिना मण्यते आहूयते
इति । मण+इण् ।) ब्रह्मा । इति शब्दरत्ना-
वली ॥ (चिन्ता एव मणिरिव यस्य । चिन्ता-
शीलत्वादेवास्य तथात्वम् ।) बुद्धविशेषः । इति
त्रिकाण्डशेषः ॥ मणिविशेषः । यथा, भट्टिः ।
"सामर्थ्यसम्पादितवाञ्छितार्थ-
श्चिन्तामणिः स्यान्न कथं हनूमान् ॥"
सूर्य्यमणिः । तथा च ।
"यथा चिन्तामणिं स्पृष्ट्वा लौहं काञ्चनतां भजेत् ॥"
इति पाद्मोत्तरखण्डम् ॥
(अश्वविशेषः । यथा, नकुलकृताश्वचिकित्-
सिते । ४ । १६ ।
"कण्ठे यस्य महावर्त्त एकोऽश्वस्य प्रजायते ।
चिन्तामणिः स विज्ञेयश्चिन्तितार्थविवृद्धिदः ॥")
चिन्तावेश्म, [न्] क्ली, (चिन्ताया मन्त्रणादेर्वेश्म
गृहम् ।) मन्त्रणागृहम् । तत्पर्य्यायः । दार्व्व-
टम् २ । इति हारावली । १६८ ॥
चिन्तिड़ी, स्त्री, (तिन्तिड़ी । पृषोदरादित्वात्
तस्य चत्वम् ।) तिन्तिड़ी । इति द्विरूपकोषः ॥
इति कश्चित् ॥
चिन्तितं, त्रि, (चिति+कर्म्मणि क्तः ।) ज्ञात-
चिन्तनम् । यथा,—
"यच्चिन्तितं तदिह दूरतरं प्रयाति
यच्चेतसा न गणितं तदिहाभ्युपैति ।"
इत्युद्भटः ॥
कर्त्तरि क्ते चिन्तायुक्तः । भावे क्ते चिन्ता ॥
चिन्तितिः, स्त्री, (चिन्त+भावे क्तिच् इट् च ।)
चिन्ता । इति शब्दरत्नावली ॥
चिन्तिया, स्त्री, चिन्ता । इति त्रिकाण्डशेषः ॥
चिन्नः, पुं, शस्यविशेषः । इति शब्दचन्द्रिका ॥
चिना इति भाषा ॥ (चीनशब्दे विशेषोऽस्य
ज्ञातव्यः ॥)
चिपिटः, पुं, (चयतीति । चि+बाहुलकात्
पिटच् स च कित् ।) भक्ष्यद्रव्यविशेषः । चिड़ा ।
इति भाषा ॥ तत्पर्य्यायः । पृथुकः २ । इति
हेमचन्द्रः । ३ । ६५ ॥ चिपिटकः ३ । इत्यमरः ॥
चिपुटः ४ । इति भरतः ॥ धान्यचमसः ५ ।
इति त्रिकाण्डशेषः ॥ चिपीटकः ६ । इति
शब्दरत्नावली ॥ अस्य गुणाः । गुरुत्वम् ।
स्निग्धत्वम् । बृंहणत्वम् । कफवर्द्धकत्वञ्च ॥ क्षीर-
युक्तस्य तस्य गुणाः । बलकारित्वम् । वायुनाशि-
त्वम् । मलभेदकत्वञ्च । इति राजवल्लभः ॥
बृंहणत्वम् । दृष्यत्वञ्च । तस्य लक्षणं यथा,
भावप्रकाशे पूर्ब्बखण्डे द्वितीये भागे ।
"शालयः सतुषा आर्द्रा भृष्टा अस्फुटितास्ततः ।
कुट्टिताश्चिपिटाः प्रोक्तास्ते स्मृताः पृथुका अपि ॥"
"शालेया यावनालाद्याश्चिपिटाः पुष्टिवर्द्धनाः ॥"
इति राजनिर्घण्टः ॥
तस्य भक्षणविधिनिषेधौ यथा,—
"द्विःखिन्नमन्नं पृथुकं शुद्धं देशविशेषके ।
नात्यन्तशस्तं विप्राणां भक्षणे च निवेदने ॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥
(नि नता नासिका विद्यतेऽस्य । "इनच्पिटच्-
चिकचि च ।" ५ । २ । ३३ । इति पिटच्
प्रकृतेश्चिरादेशश्च । नतनासिके त्रि । यथा,
विश्वकर्म्म[illegible]शापे । १३ । २ ।
"दिग्वक्रं चिपिटञ्चैव खञ्जञ्च सुरजन्तथा ॥"
इत्यस्य प माह तत्रैव । ५म श्लोके ।
"तुङ्गहीनं च चिपिटं खञ्जञ्चानर्थदर्शनम् ॥"
चिपिटाकारसुखादौ च । यथा, काशीखण्डे ।
३७ । १४ ।
"वक्त्रो ह्रस्वश्च चिपिटः सुखसौभाग्यभञ्जकः ॥"
"चिपिटः चिपिटकाकारः ।" इति तट्टीका ॥)
चिपिटकः, पुं, (चिपिट+स्वार्थे कन् ।) चिपिटः ।
इत्यमरः । २ । ९ । ४७ ॥ (स्त्रियां टाप् । नत-
नासिका ॥)
चिपिटा, स्त्री, गुण्डासिनीतृणम् । इति राज-
निर्घण्टः ॥ (चिपिटा चिपिटाकारा इति ।
चिपिट+टाप् । चिपिटमूर्त्तिः । यथा, काशी-
खण्डे । ३७ । १६ । "चिपिटाभिर्भवेद्दासी ॥")
चिपुटः, पुं, (चिपिट+पृषोदरादित्वात् साधुः ।)
चिपिटकः । इति भरतधृतरुद्रकोषः ॥
चिप्पः, पुं, (चिकति पीड़यति अङ्गुलिमिति । चिक
+अच् । निपातनात् कस्थाने पागमे साधुः ।)
नखरोगविशेषः । आङ्गुलहाड़ा इति भाषा ॥
तल्लक्षणं यथा,—
"नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम् ।
करोति दाहपाकौ च तं व्याधिं चिप्पमादिशेत् ॥"
अथ कुनखस्य लक्षणमाह ।
"अभिघातात् प्रदुष्टो यो नखो रूक्षोऽसितः खरः ।
भवेत्तं कुनखं विद्यात् कुशीरं वा विधानतः ॥"
अथ तयोश्चिकित्सा ।
"चिप्पं रुधिरमोक्षेण शोधनेनाप्युपाचरेत् ।
गतोष्माणमथैनन्तु सेचयेदुष्णवारिणा ।
शस्त्रेणापि यथायोग्यमुच्छिद्य स्रावयेत्ततः ॥
व्रणोक्तेन विधानेन रोपयेत्तं विचक्षणः ।
स्वरसेन हरिद्रायाः पात्रे कृत्वायसेऽभयाम् ॥
घृष्ट्वा तज्जेन कल्केन लिम्पेच्चिप्पं पुनः पुनः ।
काश्मर्य्याः सप्तभिः पत्रैः कोमलैः परिवेष्टितः ॥
अङ्गुलीवेष्टकः पुंसां ध्रुवमाशु प्रशाम्यति ।
शेषविद्रधिकल्पेन कुनखं समुपाचरेत् ॥
नखकोटिप्रविष्टेन टङ्कणेन प्रशाम्यति ।
कुनखश्चेत्तदा शैलः सलिले प्लवतेऽपि च ॥"
इति भावप्रकाशे मध्यखण्डे ४र्थे भागः ॥
(लक्षणान्तरमस्य यथा,—
"कुर्य्यात् पित्तानिलं पाकं नखमांसे सरुग्ज्वरम्
चिप्यमक्षतरोगञ्च विद्यादुपनखञ्च तम् ॥"
इति वाभटेनोत्तरस्थाने ३१ अध्याये उक्तम् ॥
चिकित्साऽस्य यथा,—
"चिप्यं शुद्ध्या जितोष्माणं साधयेच्छस्त्रकर्म्मणा ॥"
इत्युत्तरस्थाने द्वात्रिंशेऽध्याये वाभटेन चोक्तम् ॥)
चिमिः, पुं, (चिनोति सञ्चिनोति मनुष्यजातिवद्-
वाक्यानीति । चि+बाहुलकात् मिक् ।) शुक-
पक्षी । इति शब्दमाला ॥
चिमिकः, पुं, (चिमि+स्वार्थे कन् ।) शुकपक्षी ।
इति शब्दरत्नावली ॥
चिरं, व्य, (चि+बाहुलकात् रक् ।) दीर्घ-
कालः । तत्पर्य्यायः । चिराय२ चिररात्राय ३
चिरस्य ४ । इत्यमरः ॥ चिरेण ५ चिरात् ६
चिरे ७ । इति भरतः ॥ चिरतः८ । इति
शब्दरत्नावली ॥ (यथा, मनुः । ४ । ६० ।
"नैकः प्रपद्येताध्वानं न चिरं पर्व्वते वसेत् ॥)
चिरकारी, [न्] त्रि, (चिरं व्याप्य करोतीति ।
कृ+णिनिः ।) चिरक्रियः । (यथा, महाभारते ।
१२ । २६४ । ३ ।
"चिरकारी हि मेधावी नापराध्यति कर्म्मसु ॥")
गौतमस्य पुत्रभेदः । अस्य निरुक्त्यादिकं यदुक्तं
महाभारते । १२ । २६५ । ४-५ ।
"चिरकारी महाप्राज्ञो गौतमस्याभवत् सुतः ।
चिरेण सर्व्वकार्य्याणि विमृश्यार्थान् प्रपद्यते ॥
चिरं सञ्चिन्तयत्यर्थांश्चिरं जाग्रत् चिरं स्वपन् ।
चिरं कार्य्याभिपत्तिश्च चिरकारी तथोच्यते ॥")
चिरकालः, पुं, (चिरः काल इति कर्म्मधारयः ।)
दीर्घकालः । तत्पर्य्यायः । दीर्घरात्रम् २ ।
इति त्रिकाण्डशेषः ॥
चिरक्रियः, त्रि, (चिरं व्याप्य क्रिया यस्य ।)
चिरकालेन क्रियाकारकः । तत्पर्य्यायः । दीर्घ-
सूत्रः । इत्यमरः । २ । १ । १७ ॥
चिरजीवकः, पुं, (चिरं जीवतीति । जीव+ण्वुल् ।)
जीवकवृक्षः । इति जटाधरः ॥
चिरजीवी, [न्] पुं, (चिरं जीवतीति । जीव+
णिनिः ।) विष्णुः । काकः । इति मेदिनी ॥
जीवकवृक्षः । शाल्मलिवृक्षः । इति राज-
निर्घण्टः ॥ मार्कण्डेयः । अश्वत्थामा । बलिः ।
व्यासः । हनूमान् । विभीषणः । कृपः । परशु-
रामः । इति तिथ्यादितत्त्वम् ॥ बहुकालजीविनि
त्रि । इति जटाधरः ॥ (यथा, रामायणे । २ ।
१ । ३६ ।
"अथ राज्ञो बभूवैवं वृद्धस्य चिरजीविनः ॥")
चिरञ्जीवी, [न्] पुं, (चिरं जीवतीति । जीव
+णिनिः ।) विष्णुः । काकः । इति हेम-
चन्द्रः । ४ । ३८८ ॥ जीवकवृक्षः । शाल्मलि-
वृक्षः । इति राजनिर्घण्टः ॥ चिरजीविनि त्रि ॥
चिरण्टी, स्त्री, (चिरात् चिरेण वा अटति
पितृगृहादिति । अट+अच् । "वयसि प्रथमे ।"
४ । १ । २० । इति ङीप् । ततः पृषोदरात्
साधुः ।) स्ववासिनी । ऊढ़ा अनूढ़ा वा पितृ-